अक्षक्रीड़ा, स्त्री, (अक्षैः या क्रीड़ा) द्यूतक्रीड़ा पाशकक्रीड़ा। यथा। अक्षक्रीड़ायां व्यासयुधिष्ठिरसंवादः प्रचरति। इति तिथ्यादितत्त्वं॥ तद्विवरणं चतुरङ्गशब्दे द्रष्टव्यं॥ *॥ कार्त्तिकशुक्लप्रतिपदि तत्क्रीड़ाविधिर्यथा। ब्रह्मपुराणे,—

"शङ्करश्च पुरा द्यूतं ससर्ज सुमनोहरं।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धस्तु लब्धनाशकरो भवेत्"।

द्यूतपाशप्राशिभिः क्रीड़नं। यथा मनुः,—
"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।
इति तिथ्यादितत्त्वं॥ *॥ दशमीद्वादश्योस्तत्करणनिषेधो यथा। स्मृतिः,—

"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत्"॥

कूर्म्मपुराणे,—

"कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलमसत्यताम्।
द्यूतक्रीड़ां दिवानिद्रां व्यायामं क्रोधमैथुनं॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्"।

इत्येकादशीतत्त्वं॥ *॥ अन्यत् द्यूतशब्दे द्रष्टव्यं॥

अक्षजः पुं, (अक्ष+जन्+ड) वज्रं। इति पुरुषोत्तमः। अक्षिज इति क्वचित् पाठः। (विष्णुः। यथा भागवते,—
"जघानोत्पत्य गदया हनावसुरमक्षजः"।

अक्षणं, क्ली, (क्षण हिंसायां। नपुंसके भावेक्तः। अनुदात्तोपदेशेत्यादिना नलोपः।) लाजाः। नपुंसकं। इति मेदिनी।

अक्षतः, त्रि, (न+क्षण्+क्त) अहिंसितः। इति मेदिनी। अखण्डितः। इति शब्दरत्नावली। (यथाह मनुः,—

"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु स्थानेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्"॥)

अक्षतः, पुं, यवः। इति मेदिनी। (यथा आश्वलायनगृह्यसूत्रे,—
"अक्षतसक्तूनां नवं कलसं पूरयित्वा"।)
शस्यमात्रं। इति अमरटीकायां भानुदीक्षितः॥

अक्षताः पुं भू म्नीति स्वामी॥ (न क्षताः येषां ते इति अक्षताः। मुकुटस्तु अमरव्याख्यानावसरे लाजाः पुं भूम्नि तेऽक्षतमिति पठित्वा कर्म्मणि क्तः। क्षतं खण्डितं। न क्षतमक्षतमिति विग्रहा नित्यपुंलिङ्गाः नित्यबहुवचनान्ताश्च लाजा अक्षतमिति व्याचख्यौ॥ केचित्तु अखण्डतण्डुला अक्षतमित्याहुः।)

अक्षता स्त्री, कर्कटशृङ्गी। काँकड़ाशृङ्गी इति भाषा। इति शब्दचन्द्रिका॥ पुरुषसंसर्गरहिता स्त्री। स्मृतिः॥ यथाह याज्ञवल्क्यः—
"अक्षतायां क्षतायां वा जातः पौनर्भवः पुनः"।

अक्षदर्शकः, पुं, (अक्षाणां व्यवहाराणां दर्शकः। अक्ष+दृश्+ण्वुल्।) व्यवहारद्रष्टा व्यवहाराणां ऋणादानादिविवादानां द्रष्टा निर्णेता। धर्म्माध्यक्ष इत्यर्थः। इत्यमरः तट्टीका च॥ जज् इति इंराजीयभाषा॥

अक्षदृक्, (श्) पुं, (अक्ष+दृश्+क्विप्।) अक्षदर्शकः। (व्यवहारस्य ज्ञाता।)

अक्षदेवी, (न्) त्रि, (अक्षैर्दीव्यति। दिवु क्रीड़ादौ। सुपीति णिनि।) द्यूतक्रीड़ाकारकः। इत्यमरः॥

अक्षद्यूः, पुं, (अक्षैर्दीव्यति। दिवु क्रीड़ादौ। अक्ष+दिव्+क्विप्+ऊठ्।) अक्षक्रीड़कः। इति व्याकरणं॥

अक्षधरः पुं, (अक्ष+धृ+अच्।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

अक्षधूर्त्तः पुं, (अक्षेषु धूर्त्तः। सप्तमी शौण्डैरिति समासः।) द्यूतक्रीड़कः। तत्पर्य्यायः। धूर्त्तः २ अक्षदेवी ३ कितवः ४ द्यूतकृत् ५। इत्यमरः॥ जुयारी इति भाषा॥

अक्षधूर्त्तिल पुं, (अक्ष+धुर्+तिल्।) वृषः। इति हारावली॥

अक्षपाटकः पुं, (अक्ष+पाट+वुन्।) धर्म्माध्यक्षः। इति जटाधरः॥ जज् इति भाषा॥

अक्षपादः पुं, (अक्ष+पाद।) तार्किकः। तत्पर्य्यायः। नैयायिकः २। इति हेमचन्द्रः॥

अक्षपीड़ा स्त्री, (अक्ष+पीड़ा।) यवतिक्ता लता। इति राजनिर्घण्टः॥

अक्षमः त्रि, (नास्ति क्षमा यस्य सः।) क्षमारहितः। क्षमाशून्यः। (असमर्थः।)

"विष्णुसेवी च श्वपचो वंशानां कोटिमुद्धरेत्।
हरेरभक्तो विप्रश्च स्वञ्च रक्षितुमक्षमः"॥

इति ब्रह्मवैवर्त्ते २३ अध्यायः॥

अक्षमा स्त्री, (न क्षमा इति नञ्समासः।) अक्षान्तिः। ईर्षा। इति शब्दरत्नावली॥ (यथा किरातार्ज्जुनीये—

"अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापिनी।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति"॥

अक्षमाला स्त्री, (अक्षाणां माला।) अक्षसूत्रं। वशिष्ठपत्नी। इति मेदिनी॥ (यथाह मनुः—
"अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा"।
अक्षसूत्रेति तान्त्रिकभाषया अकारादिक्षकारान्तवर्णमाला रुद्राक्षमाला च। यथा गौतमीये,—

"पञ्चाशल्लिपिभिर्माला विहिता जपकर्म्मसु।
अकारादिक्षकारान्ता अक्षमाला प्रकीर्त्तिता॥
क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति तन्त्रसारः॥ *॥ अन्यत् मालाशब्दे वर्णमालाशब्दे च द्रष्टव्यं॥

अक्षयः त्रि, (नास्ति क्षयो यस्य सः। बहुव्रीहिः।) क्षयरहितः। अव्ययः। कल्पान्तस्थायी। यथा—

"अक्षराणि फलान्याङ्करमरांस्त्रिदशानिव।
कल्पान्तस्थानसम्बन्धान्नजन्या नाशवर्ज्जिनः"॥

इति मीमांसककारिका॥ अपि च। भविष्यपुराणं।

"चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्च्चनपरो नरः॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां।
तत् पुण्यं सफलं तस्य शिवलोकञ्च गच्छति"॥

इति तिथ्यादितत्त्वं॥ *॥ पापपुण्याक्षयजनकयोगविशेषः। यथा ज्योतिषे,—

"सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी।
चतुर्थ्यङ्गारवारे तु अष्टमी च बृहस्पतौ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः।
षष्टिजन्मसहस्राणि प्रति जन्म तदक्षयं"॥

इति तिथ्यादितत्त्वं॥ (अनन्तः। अक्षयकालानिमानी। अः वासुदेवः तस्मिन् क्षये निवासोऽस्य इति व्युत्पत्त्या ब्रह्मणिष्ठः।)

अक्षयतृतीया स्त्री, (अक्षया या तृतीया तिथिः।) वैशाखशुक्लतृतीया। सा तु सत्ययुगाद्या। तत्र स्नानदानाद्यक्षयफलं। इति। स्मृतिः। यथा,—

"वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यमक्षयं समुदाहृतं"।

इति तिथ्यादितत्त्वं॥ *॥ विवरणं तु वैशाखशब्दे द्रष्टव्यं॥

अक्षया स्त्री, (नास्ति क्षयो यस्याः सा।) वारतिथिघटितयोगविशेषः। यथा,—

"अमा वै सोमवारेण रविवारेण सप्तमी।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया"॥

इति भविष्यपुराणम्॥

अक्षरः पुं, (न क्षरति। क्षर सञ्चलने। पचाद्यच्। यद्वा। अश्नुते। अशू व्याप्तौ। अशेः सरः।) शिवः। विष्णुः। इति शब्दरत्नावली। यथा महाभारते,—

"विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च"॥

इति।) (अजः। जीवः।)

अक्षरं क्ली, (न क्षरति इति व्युत्पत्त्या।) ब्रह्म। (अविनाशि निर्व्विशेषं प्रणवाख्यं ब्रह्म। कूटस्थः नित्यः आत्मा। यथा,—

"क्षरादितरद्धर्म्मत्वादक्षरं ब्रह्म भण्यते।
कार्य्यकारणरूपं तु नश्वरं क्षरमुच्यते॥
यत्किञ्चिदस्य लोकेऽस्मिन् वाचो गोचरतां गतं।
प्रमाणस्य च तत्सर्व्वमक्षरे प्रतिषिध्यते॥
यदप्रबोधात् कार्पण्यं ब्राह्मण्यं यत्प्रबोधतः।
तदक्षरं प्रवेष्टव्यं यथोक्तेश्वरवर्त्मना"॥

अकारादिक्षकारान्तिकपञ्चाशद्वर्णः। इति मेदिनी॥
अस्योत्पत्तिकारणं। यथा वृहस्पतिः,—

"षाण्मासिके तु समये भ्रान्तिः सञ्जायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढ़ान्यतः पुरा"॥

इत्याह्निकतत्त्वं॥ तच्च पञ्चविधं। यथा,—

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुण्डिका घुणसम्भूता लिपयः पञ्चधा स्मृताः"।

इति वाराहीतन्त्रं॥ *॥ अन्यत् मुद्राशब्दे वर्णशब्दे च द्रष्टव्यं॥ गगनं। धर्म्मः। तपस्या॥